# ॥ मकारादि श्रीमत्स्याष्टोत्तरशतनामस्तोत्रम् ॥

.. makArAdi shrImatsyASh-
TottarashatanAmastotram ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : makArAdi matsyAShTottarashatanAmastotram
File name : makArAdimatsya108nAmastotram.itx
Category : aShTottarashatanAma
Location : doc_vishhnu
Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA
Latest update : January 24, 2016
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ मकारादि श्रीमत्स्याष्टोत्तरशतनामस्तोत्रम् ॥

@@
श्री हयग्रीवाय नमः ।
हरिः ॐ

मत्स्यो महालयाम्भोधिसञ्चारी मनुपालकः ।
महीनौकापृष्ठदेशो महासुरविनाशनः ॥ १॥

महाम्नायगणाहर्त्रा महनीयगुणाद्भुतः ।
मरालवाहव्यपनच्छेत्ता मथितसागरः ॥ २॥

महासत्वो महायादो गणभुङ्मधुराकृतिः ।
मदोल्लुंठनसङ्क्षुब्ध सिन्धुभङ्गहतोर्ध्वखः ॥ ३॥

महाशयो महाधीरो महौषधिसमुद्धरः ।
महायशा महानन्दो महातेजा महावपुः ॥ ४॥

महीपङ्कवृषत्पृष्ठो महाकल्पार्णवह्रदः ।
मित्रशुभ्रांशुवलयनेत्रो मुखमहानभाः ॥ ५॥

महालक्ष्मीनेत्ररूपगर्वसर्वङ्कषाकृतिः ।
महामायो महाभूतपालको मृत्युमारकः ॥ ६॥

महाजवो महापृच्छच्छिन्नमीनादिराशिकः ।
महातलतलो मर्त्यलोकगर्भो मरुत्पतिः ॥ ७॥

मरुत्पतिस्थानपृष्टो महादेवसभाजितः ।
महेन्द्राद्यखिलप्राणिमारणो मृदिताखिलः ॥ ८॥

मनोमयो माननीयो मनस्वी मानवर्धनः ।
मनीषिमानसाम्भोधि शायी मनुविभीषणः ॥ ९॥

मृदुगर्भो मृगाङ्काभो मृग्यपादो महोदरः ।
महाकर्तरिकापुच्छो मनोदुर्गमवैभवः ॥ १०॥

मनीषी मध्यरहितो मृषाजन्मा मृतव्ययः ।
मोघेतरोरुसङ्कल्पो मोक्षदायी महागुरुः ॥ ११॥

मोहासङ्गसमुज्जृम्भत्सच्चिदानन्दविग्रहः ।
मोहको मोहसंहर्ता मोहदूरो महोदयः ॥ १२॥

मोहितोत्तारितमनु र्मोचिताश्रितकश्मलः ।
महर्षिनिकरस्तुत्यो मनुज्ञानोपदेशकः ॥ १३॥

महीनौबन्धनाहीन्द्ररज्जुबद्धैकशृङ्गकः ।
महोवातहतोर्वीनौस्तम्भनो महिमाकरः ॥ १४॥

महाम्बुधितरङ्गाप्तसैकतीभूतविग्रहागः ।
मरालवाहनिद्रान्तसाक्षी मधुनिषूदनः ॥ १५॥

महाब्धिवसनो मत्तो महामारुतवीजितः ।
महाकाशालयो मूर्छत्तमोम्बुधिकृताप्लवः ॥ १६॥

मृदिताब्जारिविभवो मुषितप्राणिचेतनः ।
मृदुचित्तो मधुरवाङ्मृष्टकामो महेश्वरः ॥ १७॥

मरालवाहस्वापान्त दत्तवेदो महाकृतिः ।
महीश्लिष्टो महीनाथो मरुन्मालामहामणिः ॥ १८॥

महीभारपरीहर्ता महाशक्तिर्महोदयः ।
महन्महान्मग्नलोको महाशान्ति र्महन्मनाः ॥ १९॥

महावेदाभिसञ्चारी महात्मा मोहितात्मभूः ।
मन्त्रस्मृतिभ्रंशहेतु र्मन्त्रकृन्मन्त्रशेवधिः ॥ २०॥

मन्त्रमन्त्रार्थ तत्त्वज्ञो मन्त्रार्थो मन्त्रदैवतम् ।
मन्त्रोक्तकारिप्रणयी मन्त्रराशिफलप्रदः ॥ २१॥

मन्त्रतात्पर्यविषयो मनोमन्त्राद्यगोचरः ।
मन्त्रार्थवित्कृतक्षेमो रामं रक्षतु सर्वतः ॥ २२॥

॥ इति मकारादि श्री मत्स्याष्टोत्तरशतनामस्तोत्रम् पराभव
श्रावणशुद्ध पूर्णिमायां लिखिता रामेण समर्पिता च
श्री हयग्रीव भगवच्चरणारविन्दयोर्विजयतान्तराम् ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. makArAdi shrImatsyAShTottarashatanAmastotram ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*